Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ श्रीजिनाय नमः ॥

# ॥ अग्निकापुत्रचारित्रं ॥

( कर्त्ता-शुभशीलगणि ) ( द्वितीयावृत्तिः )

छपावीप्रसिद्ध करनार

पण्डित हीरालाल हंसराज—जामनगर.

संवत् १९९१ —(*)— सने १९३५

किमत ०-८-०

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





॥ श्री जिनाय नमः ॥

॥ श्रीचारित्रविजयगुरुभ्यो नमः ॥

# ॥ अथ श्रीअग्निकापुत्रचरित्रं प्रारभ्यते ॥

( कर्ता—श्रीशुभशीलगणी )

(छपावी प्रसिद्ध करनार—पंडित श्रावक हीरालाल हंसराज जामनगरवाळा )

घ्नत्सु वैरिषु योऽत्यंतं ! क्षमां कुर्यात्सुभावतः ॥ अग्निकापुत्रसूरीश । इवाप्नोति शिवश्रियं ॥ १ ॥

तथाहि—पूर्वं श्रीराजगृहाभिधाने नगरे श्रीवीरजिनपादांबुजसेवया बद्धतीर्थकरनामकर्मा श्रीश्रेणिकाभिधा राजा राज्यं करोतिस्म. स सर्वदा न्यायमार्गेणैव पृथिवीं प्रशशास. यतः—राज्ञि धर्मिणि धर्मिष्टाः । पापे पापाः समे समाः ॥ राजानमनु वर्तते । यथा राजा तथा प्रजाः ॥ १ ॥ तस्य राज्ञश्चिल्लणाद्या अनेका राज्ञ्यो बभूवुः, कोणिकाभयकुमारमेघकुमारादयो बहवः. पुत्राश्चासन्. तन्मध्याल्लाभाभिभूतः कोणिको राज्यवांछया श्रेणिकनृपं काष्टपंजरे क्षिप्त्वा स्वयं च राज्ये समुपविष्टः. क्रमेण श्रेणिकनृपस्य मृत्योरनंतर

For Private and Personal Use Only

तेन कोणिकेन जनकघातोत्थपश्चातापचिंतयोद्विग्नेन नूतना चंपाख्या नगरी वासिता. ततः स उद्धतः कोणिकनृपो निजचक्रित्वमभिलषन् कृत्रिमचक्रिरत्नानि निर्माय खंडत्रयं साधयित्वा वैताढ्याग्रेतनखंडत्रयं साधयितुं गुहायां प्रविष्टस्तदधिष्ठायकदेवेनाग्निज्वालया दग्धो मृत्वा षष्टे नरके गतः. ततस्तत्पुत्र उदायिनामा भूपो राज्यमलंचकार. सोऽपि चंपानगर्यां स्वजनककारित सभा क्रीडा शयनादिस्थानानि दर्शं दर्शमतीव खिन्नः शोकसागरे पतितः शून्यहृदयो जातः. सर्वराज्यकार्याणि परिहृत्य मूढ इव एकांत एव तस्थौ. एवंविधं शून्यहृदयं राजानं निरीक्ष्यामात्यैः प्रोक्तं, स्वामिन्नत्र नगरे भवदीयमनश्चेत्स्थिरतां न प्राप्नोति, तदा नवीनमेव नगरं स्थाप्यते इत्यमात्यवचनानि निशम्य राज्ञा नव्यपुरस्थापनार्थं वर्यस्थानगवेषणाय नैमित्तिकवराः समादिष्टाः, तेऽप्यमात्यवरसहिताः पुरस्थापनार्थं वर्यं स्थानं पश्यंतो गंगानदीतटे प्राप्ताः. तत्रैकं पाटलपादपं प्रफुल्लनवसुगंधपुष्पप्रकरं स्थिरच्छायं समीक्ष्य ते स्थिताः, तत्तरुशाखायां निविष्टस्यैकस्य व्यायतास्यचाषपक्षिणो मुखे स्वयमेवागत्य निपतंतं कीटकपेटकं समीक्ष्य ते स्वचेतस्येवं चिंतयामासुः, अहो ! यथास्य चाषविहंगमस्य मुखे स्वयमेवागत्य कीटकाः पतंतो विलोक्यंते, तथात्र

स्थाने नगरे स्थापिते सति राज्ञो भूरिसपदः स्वयमेवागमिष्यंति. ततस्तेऽमात्यादयः सर्वेऽपि नैमित्तिका नृपाग्रे समागत्य तदुत्तमस्थानस्वरूपं निवेदयामासुः, तान्निशम्यातीवसंतुष्टो राजा तन्मध्यादेकं वृद्धं नैमित्तिकमपृच्छत्, भो नैमित्तिकोत्तम ! तस्य पाटलतरोः कीदृग्माहात्म्यमस्ति ? अथ पूर्वं ज्ञाततत्पाटलतरुवृत्तांतः स नैमित्तिकोऽवदत्, ! हे राजन् ! स पाटलतरुः सामान्यो नास्ति. पूर्वमेकेन ज्ञानिना मम कथितमस्ति, यदयं पाटलद्रुमोऽतिपावित्र्यभाजनं वर्तते, एकावतारिमहामुनिकरोटिकातः समुत्पन्नोस्ति.

राज्ञोक्तं, भो नैमित्तिक ! एवंविधः परमपूज्यो महात्मा स को मुनिरासीत् ? नैमित्तिको वदति, हे देव ! पूर्वमुत्तरमथुरायां देवदत्ताख्यो वणिक्पुत्रो वसतिस्म, सोऽन्यदा द्रव्यार्जनार्थं दक्षिणमथुरायां समायातः. तत्र च तस्य जयसिंहनाम्नैकेन वणिक्पुत्रो वसतिस्म, सोऽन्यदा तेन जयसिंहवणिजाग्रहपूर्वं निमंत्रितोऽसौ देवदत्तस्तद्गृहे भोजनार्थं गतः, भोक्तुं च समुपविष्टः. तदा तत्रान्निकाह्वां जयसिंहजामिं भोजनं परिवेषयंतीं वीक्ष्य तद्रूपमोहितो देवदत्तस्तस्यामनुरक्तोऽजनि. ततो द्वितीयेऽह्नि देवदत्तो निजमेकं मित्रं जयसिंहसमीपे प्रेष्य तामन्निकां परिणेतुं मार्गयामास. जयसिंहेन प्रोक्तं समीचीनमेतत् खलु, परं

For Private and Personal Use Only

यो मद्गृहाद्दूरमगच्छन् मदीय एव गृहे तिष्टति, तस्मै एव निजामिमां स्वसारं यच्छामि, नान्यस्य. यत इयं मे स्वसा प्राणेभ्योऽप्यतीववल्लभास्ति. ततो देवदत्तेनापि जयसिंहपार्श्वे गत्वा तदीयवचनं स्वीकृतं. ततो वर्ये दिवसे जयसिंहस्तां निजस्वसारमग्निकां देवदत्तेन सह पर्यणाययत्. अथ तया सह भोगान् भुंजानो देवदत्तस्तत्रैव निवसतिस्म. तत एकदा देवदत्तपितृभ्यां देवदत्तायैको लेखः प्रेषितः, तद्यथा—त्वं दूरे वर्तसे पुत्र । आवां वृद्धत्वमागतौ। त्वमेव चेदिहायासि। तदा नौ जीवितं भवेत् ॥१॥ तं लेखं वाचयतस्तस्य देवदत्तस्य नेत्राभ्यामश्रूणि ववर्षुः. एवं निजस्वामिनं दृष्ट्वा दुःखं प्राप्तयाऽग्निकया रुदनकारणं पृष्टोऽपि स देवदत्तो न किंचिदपि जल्पति. तदा तया स्वयमेव लेखमादायेत्यवाचि, भो वत्स ! अथावां वृद्धौ निकटनिधनौ स्वः, यदि त्वं नौ जीवंतौ दृष्टुं समीहसे, तदा त्वया शीघ्रमत्रागंतव्यं, अत्र विषये त्वया मनागपि विचारो न कार्यः, ततस्तयाश्रुपूर्णनेत्रया अग्निकयापि खेदातुराय निजस्वामिने प्रोक्तं, स्वामिन् ! भवतो मातापितरौ वार्धक्यं प्राप्तौ स्तः, तेनावाभ्यामधुना तत्रैव गंतुं युज्यते. इति निजप्रियावचो निशम्य देवदत्तो जगौ, हे प्रिये ! मया त्वदीयभ्रातुरग्रे पूर्वं प्रतिपन्नमस्ति, यदहमत्रैव स्थास्यामि. सांप्रतं मया

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





गमनार्थं कथं जल्प्यते ? यतः सज्जनाः प्राणांतेऽपि प्रतिज्ञाभंगं न कुर्वंति. यतः—अर्थो विनश्यतु विरज्यतु बंधुवर्गो । राज्यं क्षयं व्रजतु बंधनमस्तु बाढं ॥ प्राणाः प्रयांतु निधनं न तथापि संतो । धीरा निजानि न वचांसि विलोमयंति ॥ १ ॥ तत्तियमित्तं जंपह । जत्तियमित्तं होइ निरवाहो ॥ वाया मूयाण नासइ । जोवंता मा मूआ होंतु ॥ २ ॥ तत् श्रुत्वा अन्निका प्राह, हे स्वामिन्! मातापित्रोः सममन्यत् तीर्थं नास्ति, तेन तदर्थं कदाचित् प्रतिज्ञाभंगमपि कुर्वतां न दोषः, यतः—माता गंगासमं तीर्थं । पिता पुष्करमेव च ॥ गुरुर्जंगमतीर्थं च । माता तीर्थं पुनः पुनः ॥ १ ॥ अथैवं निजस्वामिनमाश्वास्य सातीवकोमलवचनैः स्वभ्रातरमपि संतोषयामास. तेन सोऽपि देवदत्ताय निजगृहगमनायानुज्ञामयच्छत्. ततो हृष्टो देवदत्तो दध्यौ, अहो ! एवंविधा स्नेहला पतिहितकारिणी पत्नी मया क्वापि न दृष्टा ! यतः—श्वश्रूश्वशुरस्वस्वामि—भक्ता स्वजनवत्सला ॥ धर्मकर्मरता पत्नी । सुभाग्यादेव लभ्यते ॥ १ ॥ ततः स देवदत्तः सप्रिय उत्तरमथुरांप्रति प्रस्थितः. तदा सा अन्निका प्रायःसंपूर्णकाला गर्भवत्यासीत्, ततः सा मार्गे एवैकं दिव्यं सुतमसूत, तेन कियद्दिनानि तत्रैव स्थित्वा देवदत्तः सपुत्रप्रियोऽग्रे प्रस्थितः. तदा अन्निकया प्राक्तमस्य सुत-

For Private and Personal Use Only

स्याभिधानं श्वश्रूश्वशुरो दास्यतः. तेन वर्त्मनि सर्वोऽपि परिवारस्तं बालमन्निकापुत्र इत्युल्ललाप. क्रमात् प्रयाणं देवदेत्तः कुशलेन परिवारयुतः स्वीयपुरे समायातः. मातापित्रोश्च पादेभ्यो नत्वा तावुल्लासयामास. अग्निकापि श्वश्रूश्वशुरयोः क्रमयोः पतिता. मनोहरं च पुत्रं दृष्ट्वा तन्मातापितृभ्यां तस्य संधोरण इति नाम दत्तं, परं तस्य अग्निकापुत्र इत्येव नाम प्रसिद्धं बभूव. वर्धमानोऽयमन्निकापुत्रकुमारः सर्वेषां हर्षोत्कर्षमुत्पादयामास. क्रमेण प्राप्ततारुण्योऽसावन्निकापुत्रकुमारः सर्वेन्द्रियविषयपराङ्मुखो गुरूणां समीपे धर्मं शृण्वानो धर्मकार्यतत्परो बभूव, यतः——जंतुनामवनं जिनेशनमनं भक्त्यागमाकर्णनं । साधूनां नमनं मदापनयनं सम्यग्गुरोर्माननं ॥ मायाया हननं क्रुधश्च शमनं लोभद्रुमोन्मूलनं । चेतः शोधनमंद्रियाश्वदमनं प्रांते शिवप्रापकं ॥ १ ॥ इत्यादि गुरोर्मुखाद्धर्मोपदेशाकर्णनतो भोगांस्तृणवन्मन्यमानोऽग्निकापुत्रो जयसिंहाचार्यपार्श्वे दीक्षामग्रहीत्. ततोऽसौ विनयपूर्वकं गुरोः पार्श्वे शास्त्राणि पठन् क्रमेणाचार्यपदं प्राप्तः. अथैकदा सोऽन्निकापुत्राचार्यो बहुपरिवारसहितो भव्यजीवान् प्रबोधयन् वृद्धावस्थायां गंगातटे पुष्पभद्राख्यं पुरं संप्राप्तः. तत्र पुष्पकेतुनामा राजा राज्यं करोतिस्म. तस्य पुष्पवत्यभिधाना

राज्ञी बभूव. अन्यदा तस्या राज्ञ्याः पुत्रपुत्रीरूपौ युग्मौ जातौ. तयोः पुष्पचूलः पुष्पचूला चेत्यभिधाने कृते. तौ सहैव वर्धमानौ क्रीडंतौ च परस्परमतीवप्रीतिमंतौ जातौ यौवनं च प्राप्तौ. तदा राजा दध्यौ यद्येतौ दारकौ पृथक्पृथक् विवाहकरणेन वियोजयिष्येते, तदा नूनमेतौ वियोगदुःखेन मरिष्यते, किंचाहमपि तयोर्वियोगं सोढुमशक्तोऽस्मि. तदनयोरेव परस्परं विवाहकरणं सुंदरं. इति विचिंत्य तेन निजामात्यपौरादिवर्गं समाकार्य पृष्ट, भो लोकाः! यद्रत्नमंतःपुरे समुत्पद्यते तस्य कः स्वामी? तैरुक्तं स्वामिन्! तस्य रत्नस्य यूयमेव स्वामिनः. पुरोत्पन्नवस्तूनामपि यदि यूयमेव स्वामिनः, तर्हि अंतःपुरोत्पन्नरत्नानां तु नितरां यूयमेव स्वामिनः, स्थ, अस्मिन् विषये कः संदेहः? तदा राज्ञा प्रोक्तं मम पुत्रपुत्र्यो परस्परं विवाहं कर्तुं मदीयाभिलाषोऽस्ति. इत्युक्त्वा राज्ञा तयोर्निजसंतानयोः परस्परं विवाहः कारितः. तद्विधाने निवारयंत्या अपि राज्ञ्या वचो नृपेण न मेने. अथ कृतविवाहौ तौ दंपती सुखेन नानाविधभोगान् भुंजातेस्म. मनस्यतीवदुःखिता राज्ञी पुष्पचूला स्वामिनं प्राह, हे नाथ! कोऽयं त्वया ह्यनर्थो विहितः? तन्निशम्य क्रोधोद्धतो राजा राज्ञीं निर्भर्त्स्योवाच रे दुष्टे! पुनर्यद्येतद्विषये प्रजल्पिष्यसि, तदा त्वां निश्चितं हनिष्यामि, इति धिक्कृता सा राज्ञी समुत्पन्नवैरा-

ग्या श्रीगुरूणां समीपे चारित्रं जग्राह. तीव्रतरं तपश्च तप्त्वा शुभाराधनया पंचत्वं प्राप्य सा स्वर्गे देवीभूता तदनंतरं क्रमेण स पुष्पकेतुनृपोऽपि कथाशेषो जातः. ततः स पुष्पचुला राजा बभूव. अथ स पुष्पवतीजीवदेवोऽवधिज्ञानात् स्वकीयपुत्रपुत्र्योरकृत्यं विज्ञाय तन्निवारणाय तत्रागत्य पुष्पचूलायाः स्वप्नांतर्नरकस्य भयंकरदुःखानि दर्शयामास. ततः सा जागरिताऽतीवभयभीता कंपितांगी पत्युः पुरस्तत्सर्वं वृत्तांतं निवेदयामास. तन्निशम्य भीतः पुष्पचुलनृपोपि शांतिकपौष्टिकादिकर्म कारयामास. अथ स देवस्त्वेवं प्रतिदिनं तस्यै नारकदुःखानि स्वप्नांतर्दर्शयामास. अथातीवभीतो राजा बोद्धादिसर्वतीर्थिकानाकार्य पप्रच्छ, भो तीर्थिकाः ! नरकाः किंस्वरूपा विद्यंते ? तदा केचिदाहुः राजन् ! गर्भावास एव नरकः, केचिदूचुः कारावास एव नरकः, केचिद् दरिद्रतां केचिच्च पारतंत्र्यमेव नरकं निवेदयामासुः परं कैरपि सत्यं नरकस्वरूपं न निवेदितं. एवं तैर्बौद्धादिभिः प्रोक्तं नरकस्वरूपं निशम्य तत्सर्वं स्वदृष्टनरकस्वरूपविपरीतं विभाव्य राज्ञी प्राह, भो दार्शनिकाः ! एवंविधा नरका न भवंति. तता नृपतीराज्ञीयुतोऽग्निकापुत्राचार्योपांते गत्वावदत्, हे भगवन् ! नरकाः कीदृशा भवंति ? तैराचार्यैर्यथास्थितं नरकस्वरूपं तस्मै निवे-

दितं. तन्निशम्य राज्ञी प्राह, हे भगवन् ! किं भवद्भिरप्ययं स्वप्ना दृष्टः ? सूरिराह, भो श्राविके ! मया स्वप्नो नैव दृष्टः, किंतु सर्वज्ञभाषितशास्त्रज्ञानादयं वृत्तांतः सत्यस्वरूपेण मया भवतोरग्रे कथितोऽस्ति. जैनागमज्ञानात् सकलमप्येवंविधं स्वरूपं ज्ञायते. तदा पुष्पचूला प्राह, भगवन् ! केन कर्मणा प्राणिनां नरके गमनं जायते ? गुरुराह भो महाभागे ! महारंभपरिग्रहेः, गुरुप्रत्यनीकतया. पंचेंद्रियवधात्, मांसाहाराच्च जंतवो नरकेषूत्पद्यंते. इति विज्ञाय गतसंशया राज्ञी भूपान्विता गुरुं प्रणम्य स्वस्थानं गता. अथैकदा स पुष्पवतीजीवसुरस्तस्यै स्वर्गसुखानि दर्शयतिस्म. ततो राज्ञीप्रेरितनृपेण स्वर्गस्वरूपं पृष्टास्ते सर्वेऽपि पाखंडिनः प्रोचुः, यद्वयंपकान्नादि भक्ष्यते, पट्टकुलादि परिधार्यते, वयं यानासनादिषूपविश्यते, रमणीयविलासादि परिभुज्यते, तानि सर्वाणि स्वर्गसुखान्येव कथ्यंते. तदाकर्णनतोऽसंतुष्टा राज्ञी भूपयुता अन्निकापुत्राचार्यसमीपे गत्वा पुनः स्वर्गस्वरूपमपृच्छत्. गुरुभिरुक्तं सर्वज्ञोक्तगृहियतिधर्मसेवनेन द्वादशदेवलोकेषु यानि भूयांस्यनुपमानि सुखानि प्राप्यंते, तानि स्वर्गसुखान्युच्यंते. इत्युक्त्वा जिनागमप्रोक्तं सत्यं स्वर्गस्वरूपं गुरुभिस्ताभ्यां निवेदितं. एवंविधं स्वर्गसुखस्वरूपं निशम्य प्रतिबुद्धा वैराग्यं प्राप्ता राज्ञी

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





कृतांजलिपुटा निजस्वामिनं प्राह, भो कांत ! मम जिनोक्तप्रव्रज्याग्रहणाभिलाषो वर्तते, अतो मामनुजानीथ? राजा प्राह, हे प्रिये ! अहं क्षणमपि भवत्या वियोगं सोढुमसमर्थः, अतस्त्वं प्रव्रज्यां गृहीत्वात्रैव स्थिता मदीयगृहादेव शुद्धाहारग्रहणपरा भवेस्तदैव त्वां प्रव्रज्यार्थमनुजानामि, नान्यथा. तयापि तदीयवचसि स्वीकृते राजा तस्यै प्रव्रज्यां दापयामास. एवं गृहीतदीक्षा पतिगृहस्थिता सा पुष्पचूला राज्ञी द्विचत्वारिंशदोषरहितं विशुद्धमाहारं गह्णातिस्म. अथान्यदा श्रुतोपयोगाद्भाविदुर्भिक्षं परिज्ञायाग्निकापुत्रसूरिर्मुनिसमुदायं देशांतरे प्रेषयामास, क्षीणजंघाबलाः सूरयस्तु तत्रैव तस्थुः. सा पुष्पचूलासाध्वी च नृपांतःपुरात् शुद्धं भक्तपानीयादि समानीय गुरुभ्यः समर्पयति. एवं क्रमेण गुरुसेवाप्रकर्षात् क्षपकश्रेणिमारूढायास्तस्याः पुष्पचूलासाध्व्याः केवलज्ञानं समुत्पन्नं. एवमुत्पन्नकेवलज्ञानापि सा गुरुवैयावृत्यकरणतो न विरराम. छद्मस्थेन गुरुणापि तस्याः केवलज्ञानोत्पत्तिस्वरूपं न ज्ञातं, यदियं केवलज्ञानालंकृतापि शुद्धाहारानयनादिना मे विनयं करोतीति. अथान्यदा वर्षत्यपि जलदे सा पुष्पचूला साध्वी केवलवत्यपि यावद्गुरुसमीपे आहारमानीयार्पयति, तदा गुरुभिरुक्तं, हे वत्से ! त्वं पुण्यवती च श्रुतज्ञासि, तत्कथमेवंविधे

वर्षत्यपि जलदे त्वयाहारः समानीतः ? तयोक्तं, भगवन् ! यत्र यत्र प्रदेशेष्वचित्तोऽप्काय आसीत्, तेषु तेषु प्रदेशेषु यत्नाद्दत्तपादाहमत्रागतास्मि. गुरुराह ! भो भाग्यवति ! कथं त्वया सोऽचित्तप्रदेशो ज्ञातः ? तयोक्तं भगवन् ! भवदीयप्रसादादेव मया ज्ञानेन ज्ञातः. तत् श्रुत्वा विस्मितैर्गुरुभिः पृष्टं, हे भगवति ! किं तव प्रतिपाति ज्ञानं विद्यते ? वा अप्रतिपाति ? तयोक्तं भगवन् ! अप्रतिपाति ज्ञानं मे वर्तते. तन्निशम्य गुरुस्तथायोवाच, मिथ्या दुष्कृतं भवतु, हा हा ! मया केवल्याशातना कृता ! इति पुनः पुनर्निजात्मानं निंदंतो गुरुवस्तामपृच्छन्, भो भगवति ! किमहं सेत्स्यामि ? वा न ? सा प्राह भगवन् ! अधृतिं मा कुरुध्वं ? गंगानदीमुत्तरतां युष्माकमपि केवलज्ञानं भविष्यति. ततः सोऽन्निकापुत्राचार्या अपि भूरिलोकैः सह गंगानदीमुत्तरितुं नावमेकामारोहन्.

अथ यत्र यत्र नौमध्ये स सूरिन्यषीदत्, तत्र तत्र सा नौर्जले निमज्जनं कर्तुं प्रवृत्ता. तदनु मध्यासीने सूरी सा सर्वापि नौर्जले मंक्तुं लग्ना. तदा नौस्थितैः सर्वैर्जनैर्मिलित्वोत्पाट्य स सूरिर्जलमध्ये प्रक्षिप्तः. तदा दुर्भगीकरणपूर्वविराद्धया प्राग्भवपत्न्या व्यंतरीभूतया स सूरिरंतर्जलं शूलायां निहितः. एवं शूल-

प्रोतोऽपि स महात्मा सूरिर्हामदीयरुधिरेणाप्कायविराधना भवतीति ध्यायन् क्षपकश्रेण्यारूढः सर्वकर्म-
क्षयादुत्पन्नकेवलज्ञानः सद्यः समाप्तायुष्कोंतकृत्केवलीभूय मुक्तिं प्रयातः. तदा तत्रासन्नसुरैर्मिलित्वा त-
स्यांतकृत्केवलिनः केवलज्ञानमहश्चक्रे, ततस्तत्तीर्थं जगति ‘ प्रयाग ’ इति नाम्ना प्रख्यातं जातं. एवं तस्य
सूरेः शूलप्रोतत्वाद्गतानुगतिकतया चाद्यापि मिथ्यात्वाभिभूता माहेश्वरादयः परसमयानुयायिनः स्वांगेषु
क्रकचं दापयंति. अथ तस्य सूरिवरस्य करोटिर्यादोभिस्त्रोट्यमानापि जलोर्मिभिरुच्छलिता नदीतीरं प्राप्ता.
तत्र नदीतटे शुक्तिवत् क्वापि गुप्ते विषमप्रदेशे सा करोटिर्मृत्तिकास्थगिता तस्थौ. एवं दैवयोगात्कदा-
चित्तस्यां पवनप्रेरितं पाटलाबीजं पपात. वर्षाकाले तद्बीजोत्पन्नांकुरः क्रमेण करोटीकर्परं भित्वा भूमौ विल-
ग्नः, क्रमात् स पाटलातरुर्वृद्धिं प्राप्नुवन् महान् वृक्षो जातः. एवं स पाटलापादपो महाप्रभावोऽस्ति. एवं
वृद्धनैमित्तिकोक्तं निशम्य राजा तत्रैव स्थाने नवीननगरस्थापनार्थं निजसेवकानादिदेश. विचक्षणास्ते
नृपसेवका अपि तस्य पाटलातरोः स्थानाच्चतुःषु दिक्षु जायमानं शिवाशब्दं श्रुत्वा तावंतं प्रदेशमधिकृ-
त्य पुरस्य चतुरस्रं निवेशं चक्रुः. एवं पटलायाश्चतसृषु दिक्षु स्थापितत्वात्तस्य नगरस्य पाटलीपुत्रमि-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्यभिधानं बभूव राजापि तत्रैव समागत्य निजनिवासमकरोत् व्यवहार्यादयो भूरिलोका अपि तत्रैव समेत्य न्यवसन्, महानंदश्च प्रवर्तितः. तस्य पाटलातरोरसमकुसुमबाहुल्यतया कुसुमपुरमित्यपि तस्य पुरस्य रूढं नाम जातं. ततस्तस्य नगरस्य मध्ये स उदायिराजा कैलासशैलसोदरं स्फटिकाश्ममयं श्रीजिनप्रासादमपि कारयामास, तन्मध्ये चारिष्टरत्नमयीं श्रीनेमिजिनप्रतिमां भूरिद्रव्यव्ययपूर्वकं महोत्सवेन स्थापयामास. एवं प्राकारानेकजिनप्रासादमहेभ्यालयवापीकूपतडागसत्रागारादिरम्यं तन्नगरं स्वश्रिया स्वर्गपुरीमपि जिगाय. तत्र नगरे स उदायिराजा जैनधर्मसुवासितसप्तधातुश्चिरं न्यायेन राज्यं पालयामास. अथान्येद्युः स उदायिराजा धर्मश्रवणार्थं गुरुपार्श्वे गतः, तदा गुरुभिरपि तस्य धर्मोपदेशो दत्तः, यथा—प्राज्यानि भोज्यानि हि वांछितानि । सौभाग्यनैरोग्यसुयोग्यवर्ग्याः ॥ रामारमारम्ययशोविलासाः । स्वर्गापवर्गौ प्रभवंति धर्मात्. ॥ १ ॥ दारिद्र्यमुद्रा परसेवनं च । दुष्टस्वभावो विपदागमश्च ॥ एकत्वरंकत्वकदन्नभोज्य--कुरूपमुख्यानि भवंत्यधर्मात्. ॥ २ ॥ किं च यः कोऽपि भव्यजीवः श्रीशत्रुंजयतीर्थे गत्वा श्रीयुगादिजिनं प्रणमति, स स्वर्गापवर्गौ लभते, यतः--शत्रुंजये जिने दृष्टे । दुर्गतिद्वितयं क्षिपेत् ॥ सागराणां



For Private and Personal Use Only

सहस्रं तु । ध्यानाल्लक्षमभिग्रहात्. ॥ १ ॥ नमस्कारसमो मंत्रः । शत्रुंजयसमो गिरिः ॥ गजेंद्रपदजं नीरं । निर्द्वंद्वं भुवनत्रये ॥ २ ॥ दृष्ट्वा शत्रुंजयं तीर्थं । नत्वा रैवतकाचलं ॥ स्नात्वा गजपदे कुंडे. । पुनर्जन्म न विद्यते ॥ ३ ॥ एवंविधां धर्मदेशनां निशम्य शत्रुंजयतीर्थमाहात्म्यं च विज्ञाय शुभभावोल्लासितमना नृपः श्रीशत्रुंजयतीर्थयात्रार्थं भूरिदेशेभ्यश्चतुर्विधसंघं समाकार्य शुभमुहूर्ते चतुरंगसैन्ययुतो महोत्सवेन शत्रुंजयतीर्थंप्रति चचाल. मार्गे च स्थने स्थाने जिनप्रासादेषु पूजास्नात्रमहोत्सवारात्रिकध्वजारोपणादिकार्याणि कुर्वन् स राजा शत्रुंजयतीर्थे ययौ. तत्रापि स भूपालो महताडंबरेण श्रीयुगादिदेवस्य स्नात्रपूजारात्रिकोत्तारणादिक्रियापुरस्सरं चतुर्विधसंघं भोजनवस्त्रद्रव्यदानादिना सच्चकार. ततोऽसौ गिरनारगिरौ गत्वा संघयुतः श्रीनेमिजिनमभ्यर्च्य निजजीवितं सफलमकरोत्. यतः-शत्रुंजयाद्रिरयमादियुगे गरीया-नासीदसीमसुकृतोदयराशिरेव ॥ आदीयमानसुकृतः किमु भव्यलोकैः । काले कलौ भजति संप्रति दुर्बलत्वं ॥१॥ एवं तयोर्द्वयोरपि तीर्थयोर्यात्रां विधाय स उदायिनृपः संघयुतो निजनगरमासादयामास. तत्र निजनगरेऽपि स जिनप्रासादेषु स्नात्रमहोत्सवं कारयामास. एवमयमुदायिराजा अनेकभव्यजिनप्रासादनिर्मापण-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पुरस्सरं श्रीदेवगुरुभक्तिं करोतिस्म, उभयकालं प्रतिक्रमणं च कुर्वन् त्रिसंध्यं जिनपूजामकरोत्. क्रमाद् वृद्धभावं प्राप्तः सन् स्वपुत्रं राज्ये निवेश्य स्वयं कृताराधनः पंचत्वं प्राप्य स्वर्गे जगाम, क्रमेण स मुक्तिमपि यास्यति. ॥ इति श्री अग्निकापुत्राचार्यचरित्रं समाप्तं ॥ श्रीरस्तु ॥

आ ग्रंथ श्री जामनगर निवासी पंडित श्रावक हीरालाल हंसराजे स्वपरना श्रेयमाटे
श्री शुभशीलगणीजीए रचेला कथाकोषमांथी उद्धरीने तेनी मूलभाषामां बनता
प्रयासे सुधारो वधारो करीने पोताना श्री जैनभास्करोदय
छापखानामां छापी प्रसिद्ध कर्यो छे.



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ इति श्रीअन्निकापुत्रचरित्रं समाप्तम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private and Personal Use Only